CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
SJPB
Coll. No. 368

Title Siva panjara.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 368 Subject : Pauranic Rit

Title : Śiva panjara

Author : — Scribe : —

Date of the work : — Date of the Ms. : —

Place of the work : — Place of the Ms. : —

Size : 9" by 5" Extent : 6 foll

Language : Sanskrit Script : Devanāgarī

Remarks : —

896

॥श्रीगणेशायनमः॥ ॥श्रीदक्षिणामूर्त्तयेनमः॥ वरतरु
तलवासबद्धतृष्णं मुनींद्रनिकरादियविकसासंत॥ पशु
पतिमृगराजकन्यकायैस्मरहृदयोशुवितीर्णवामभागं
॥१॥ प्रणम्यसांबमीशानंशिरसावैणुकोमुनिः॥ विनयावन
तोभूत्वापप्रच्छस्कंदमादरात्॥२॥ नारदउवाच॥ भगवन्पर
मेशानसंप्राप्ताखिलशास्त्रकं॥ स्कंदसेनापतेस्वामिन्पार्व
तीप्रियनंदनः॥३॥ यज्जपात्कविताविद्याशिवभक्तिश्चशा
श्वती॥ अवाप्तिरणिमादीनांसंपदांप्राप्तिरेवच॥४॥ भूतप्रे

तपिशाचानामगम्यत्वमरोगती॥ महाविज्ञानसंप्राप्ति
र्महाराजसुपूजनं॥५॥ यस्यप्रसादादेवानांमहाभाग्यादि
संपदः॥ नष्टराज्यस्यसिद्धिश्चतथानिगडुमोचनं॥६॥ ऋण
दारिद्रनाशश्चतनयप्राप्तिरेवच॥ अश्रुतस्यप्रबंधस्यस
म्यक्व्याख्यानपाटवं॥७॥ प्रतिभोन्मेषणंचैवप्रबंधरचना
तथा॥ भवत्यचिरकालेनतंब्रूहिहरसुप्रज॥८॥ स्कंदउवा
च॥ साधुपृष्टंमहाभागकमलासनसुप्रजा॥ त्वयैतत्पृष्ट
मेतद्धिजगतामुपकारकं॥९॥ बालएवपुरासोहंस्वपनं

प्राप्तवान्यदा॥ तदामन्निकटेप्राप्य दक्षिणामूर्त्तिरुपधृक्
१०॥ तितामेपंजरंस्वस्यसर्वविज्ञानदायकं॥ उपदिशदहं
तेनविज्ञानमगमंध्रुवं॥ ११॥ देवसेनाधिपत्यंचतारकस्यज
यंतया॥ विद्यामयोहंभगवंस्तज्जपान्मुनिसत्तम॥ १२॥ तस्मा
त्तस्यजपंकुर्यादात्मनःक्षेमऽद्यदि॥ इतःपूर्वंनकस्यापिम
यादत्तंयतव्रत॥ १३॥ उपदेशंतवैवाद्यकरवाणिशुभाप्तये॥
त्वन्मुखाद्देवलोकेषुप्रसिद्धंगमयिष्यति॥ १४॥ ऋषिस्तस्यशु
कःप्रोक्तःछंदोनुष्टुप्कीर्त्तितं॥ दैवतंदक्षिणामूर्त्तिःप्रणवो

बीजमिष्यति॥ १५॥ वर्णःशुक्लःसमाख्यातोवांछितार्थेनयु
ज्यते॥ ततःसदाशिवंध्यायेद्दक्षिणामूर्त्तिमव्ययं॥ १६॥ छायापि
हितविश्वस्यमूलेन्यग्रोधशाखिनः॥ मणिसिंहासनासीनं
मुनिवृंदनिसेवितं॥ १७॥ वरभूषणदीप्तांगंमाणिक्यमुकुटो
ज्वलं॥ मंदाकिनीजलस्पर्द्धिप्रभाभावितविग्रहं॥ १८॥ शुद्ध
स्फटिकमालाढ्यंशुक्लयज्ञोपवीतिनं॥ शुक्लवस्त्रपरीधानंशु
क्लमाल्यानुलेपनं॥ १९॥ स्फटिकीमक्षमालांचवह्नींचभुजगा
धिप॥ पुस्तकंचभुजैर्दिव्यैर्दधानंचंद्रशेखरं॥ २०॥ मंजुमंजूर

निनदैरालष्टाखिलसारसं॥ केयूरकोटिविलसद्वरमाणिक्य
कांतिभिः॥२१॥ तेजिताशेषभुवनं तेजसामेकमाश्रयं॥ जाह्न
वीसलिलोन्मग्नजटामंडलमंडितं॥२२॥ उत्फुल्लकमलोदा
रचक्षुषं कमलानिधिं॥ भुजंगशिशुवित्रस्यकुरंगशिशुमं
डितं॥२३॥ अगेंद्रतनयासक्तं वरांगमनलप्रभं॥ पादभूभू
षणासक्तं नागनारीसमावृतं॥२४॥ कैलाशशृंगसंकाशं म
होक्षवरवाहनं॥ ब्रह्मादिभिरनुध्येयं ब्रह्मण्यं ब्रह्मनिष्ठितं
२५॥ प्राचीनामपिगिरामगोचरमनुत्तमं॥ ध्यायन्नेवं महा

देवं प्रजपेत्पंजरं शुभं॥२६॥ वीरासनैकनिलयाय हिरण्य
याय न्यग्रोधमूलग्रहिणे निटिलेक्षणाय॥ गंगाधराय ग
जचर्मविभूषणाय प्राचीनपुण्यपुरुषाय नमः शिवाय॥२
७॥ मुद्रापुस्तकवह्निनागविलसद्बाहुप्रसन्नाननं मुक्ता
हारविभूषितं शशिकलाभास्वत्किरीटोज्वलं॥ अज्ञानापह
मादिमादिमगिरामर्थं भवानीपतिं न्यग्रोधांतनिवासिनप
रगुरुं ध्यायेदभिष्टाप्तये॥२८॥ शिरो मे दक्षिणामूर्त्तिः पातु
पाशविमोचनं॥ भालं पातु महादेवः पातु मे विश्वदृग्दृशौ

२९॥ श्रवणेपातुवेदात्मापातुगंडस्थसंहरः॥ स्निग्धरोमेना
सिकांपातुपात्वोष्ठेपार्वतीपतिः॥३०॥ जिह्वांमेपातुविश्वात्मा
दंतान्पातुवृषध्वजः॥ चिबुकंपातुसर्वात्माश्रीकंठंकंठमेव
च॥३१॥ स्कंधौपातुवृषस्कंधःशूलपाणिःकरोमम सर्वस्तो
हृदयंपातुस्तनौपातुगजांतकः॥३२॥ वक्षोमृत्युंजयःपातु
कुक्षिंकुक्षिस्थविष्टपः॥ त्रिवलित्रयंपातुनाभिंपातुगि
रीश्वरः॥३३॥ व्योमकेशःकटिंपातुगुह्यंपातुपुरांतकः॥
ऊरूंपातुमखध्वंसीजानुनीपातुशंकरः॥३४॥ अपस्मारप ४

मदोमेपादौपातुमहेश्वरः॥ रोमाणिव्योमकेशोमेपातु
मांसपिनाकधृक्॥३५॥ दारान्पातुविरूपाक्षःसुतान्पातुज
टाधरः॥ पशून्पशुपतिःपातुभृतान्भूतेश्वरोमम॥३६॥ रक्षा
हीनंतुयत्स्थानंसर्वतःपातुशंकरः॥ इतीदंपंजरंयस्तु
पठेन्नित्यंसमाहितः॥३७॥ गद्यपद्यात्मिकावाणीमुखान्निः
सरतिध्रुवं॥ व्याचष्टेस्मकृतंशास्त्रंतनुतेकाव्यनाटकं॥३
८॥ शास्त्राण्यष्टादशत्रयोवेदाःसमयाःषट्तथैवच॥ स्वयमेवप्रका
शंतेनात्रकार्याविचारणा॥३९॥ तस्यगृहेमहालक्ष्मीःसन्नि

धत्ते सदा नघ॥ तस्य कात्यायनी देवी प्रसन्ना वरदा भवेत्
४०॥ आ यो व्याधयश्चास्य न भवंति कदाचन॥ स च नाशय
ते नित्यं कालमृत्युमपि ध्रुवं॥ ४१॥ जपेदवश्यं विद्यार्थी ग्रह
णे चंद्रसूर्ययोः दक्षिणामूर्त्तिदेवस्य प्रसादात्पंडितो भवे
त्॥ ४२॥ भक्तिश्रद्धापुरस्कृत्य दक्षिणामूर्त्तिपंजरं॥ जपित्वा
कविताविद्या प्राप्नुयात्सर्वथा पुरा॥ ४३॥ जलमध्ये स्थितो भू
त्वा जपित्वा पंजरोत्तरं॥ भूतप्रेतपिशाचादीन्नाशयेन्ना
त्र संशयः॥ ४४॥ महापतकयुक्तो वा त्रिविधैः सर्वपातकैः॥

मुच्यते ब्रह्महत्याया अपि नारदसत्तमः॥ ४५॥ त्रिसंध्यं पंजर
मिममावर्त्तयति यः पुमान्॥ किं न सिद्ध्यंति तस्यात्र सुकृतं
मुनिसत्तमः॥ ४६॥ तेनेष्टं राजसूयेन कृतदानानि तेन च॥ पुं
शब्दवाच्यः स पुमान्पुण्यानां भाजनं समं॥ ४७॥ रोगमुक्तः
स एव स्यादनूनां कीर्त्तिमाप्नुयात्॥ पुत्राः कलत्रं तस्यास्य सं
पद्यंते न संशयः॥ ४८॥ प्राप्नुयात्तदलं राज्यं तथा बंधनमोच
नं॥ पूज्यते पार्थिवस्थाने तस्य वश्यावरंगना॥ ४९॥ बंधूनां रक्ष
णे भूयात्समानेषूत्तमो भवेत्॥ इह भुक्त्वाखिलान्भोगान्त

थैवामुष्मिकानपि ॥ ५० ॥ कैलासेषु चिरंस्थित्वा शिवस्य मू
र्त्तिसन्निधौ ॥ तमादवाप्य विज्ञानं प्राप्य रुद्रत्वमेव च ॥ ५१ ॥
यं विलयं यांति तत्वार्थे नात्र कार्या विचारणा ॥ तस्मात्सर्वप्रयत्ने
न मोक्षार्थी सर्वदा पठेत् ॥ ५२ ॥ इममावर्त्तयेन्नित्यं शिवस्य मू
र्त्तिपंजरं ॥ ५३ ॥ ॥ इति श्री ब्रह्मांडपुराणे गुहनारद
संवादे शिवपंजरं नाम अष्टाशीतितमोध्यायः ॥ ॥ छ ॥
॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥